## सप्तमाध्यायस्य
## चतुर्थः पादः

### णौ चङ्युपधाया ह्रस्वः। (१/२३१४)

[1]अङ्गस्य (६.४.१/२००) इति वर्तते। चङ्परे णौ [2]यदङ्गम्, तस्य उपधाया ह्रस्वो भवति। अचीकरत्। अजीहरत्। अलीलवत्। [3]अपीपवत्। अत्र द्विर्वचनोपधाह्रस्वत्वयोः प्राप्तयोः परत्वादुपधाह्रस्वत्वम्, तत्र कृते द्विर्वचनम्। इह [4]तु मा भवानटिटत् इति नित्यत्वाद् द्वितीयस्य द्विर्वचनं प्राप्नोति, तथा सति ह्रस्वभाविनोऽङ्गस्य अकारस्य उपधात्वं [5]विहितम् इति ह्रस्वो न स्यात्? नैष दोषः। ओणेः ऋदित्करणं ज्ञापकं नित्यमपि द्विर्वचनमुपधाह्रस्वत्वेन बाध्यते इति। णौ इति किम्? चङ्युपधाया ह्रस्वः इत्युच्यमाने [6]अलीलवत् इत्यत्र वचनसामर्थ्यात् अन्तरङ्गामपि वृद्धिमादेशं च बाधित्वा ह्रस्वः स्यात्। अदीदपत् इत्यत्र ह्रस्वत्वेन [7]पुको बाधः स्यात्। अपीपचत् [8]इत्येवमादौ तु नैव [9]स्यात्। चङि इति किम्? कारयति। हारयति। उपधाया इति किम्? अचकाङ्क्षत्। अववाञ्छत्। तदेवदुपधाग्रहणमुत्तरार्थमवश्यं कर्तव्यं तदिहापि ह्रस्वत्वं निवर्तयति इत्येवमर्थं येन नाव्यवधानम् (व्या.प. ४६) इत्येतन्नाश्रयितव्यम् [10]इति।

[८६८] उपधाह्रस्वत्वे [11]णेर्णिच्युपसङ्ख्यानम्। (म.भा. ३.३४५)

वादितवन्तं प्रयोजितवान् अवीवदत् वीणां परिवादकेन (म. भा. ३.३४५)। योऽसौ णौ णिलोपस्तस्य स्थानिवद्भावेन अग्लोपित्वात् [12]अङ्गस्य ह्रस्वो न प्राप्नोति। ण्याकृतिनिर्देशात् सिद्धम्॥

### नाग्लोपिशास्वृदिताम्। (२/२६७२)

अग्लोपिनामङ्गानां शासेः ऋदितां च णौ चङि उपधाया ह्रस्वो न भवति। अग्लोपिनां तावत् – मालामाख्यत् अममालत्। मातरमाख्यत् [13]अममातरत्। राजानमतिक्रान्तवान् अत्यरराजत्। लोमान्यनुमृष्टवान् [14]अन्वलुलोमत्। अगेव यत्र केवलो लुप्यते तत्र स्थानिवद्भावादपि सिद्धम्, हलचोरादेशे तु न सिध्यति इति तदर्थमेतद् वचनम्। शासेः – [15]अशशासत्। ऋदिताम् – बाधृ – अबबाधत्। [16]याचृ – अययाचत्। ढौकृ – अडुढौकत्॥

### भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्याम्। (३/२५६७)

भ्राज भास भाष दीप जीव मील पीड इत्येतेषाम् अङ्गानां णौ चङि उपधाया ह्रस्वो भवति अन्यतरस्याम्। भ्राज – [17]अबिभ्रजत्, अबभ्राजत्। भास – अबीभसत्, अबभासत्। भाष – अबीभषत्, अबभाषत्। दीप – अदीदिपत्, अदिदीपत्। जीव – अजीजिवत्, अजिजीवत्। मील – अमीमिलत्, अमिमीलत्। पीड – अपीपिडत्, अपिपीडत्। भ्राजभासोर्ऋदित्करणमपाणिनीयम्।

---

1. वाक्यमिदं नास्ति ब.इ. 2. यदन्तस्य क. 3. अदीददत् क.ड, अपीपतत् ड. 4. च क.इ. 5. विहतम् क. 6. अचीचरत् ह. 7. पुको वा क, पुके ब. 8. इत्येवमर्थं क. 9. ह्रस्वत्वं इत्यधिकम् ब. 10. भवति ह. 11. णौ णिचि उपसङ्ख्यानम् इति पाठान्तरम्। णौ परतो यो णिः तस्मिन्नित्यर्थः ड. 12. अस्य ब. 13. अवमातत् क.ड.ह, अममानत् इ. 14. अनुलुलोमवत् क, अनूलुलोमत् ब. 15. अन्वशशासत् ह. 16. चायृ – अचचायत् ब. 17. अबभ्रजत् ब.